# S-III/4/22SNYS3EGTC4D/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (GE-3)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. परामर्शः कः?
2. पक्षविशेषणकपरामर्शम् उदाहरत।
3. अनुमितिं प्रति करण-व्यापारौ कौ?
4. पक्षधर्मताज्ञानम् उदाहरत।
5. पूर्वपक्षव्याप्तेः स्वरूपं किम्?
6. का नाम पक्षता?
7. 'पर्वतो वह्निमान् धूमात्' इत्यत्र पक्ष-साध्य-हेतून् निर्दिशत।
8. सिद्धान्तव्याप्तिलक्षणं किम्?
9. किं नाम व्यापकत्वम्?
10. सिद्धान्तव्याप्तिलक्षणे अभावः कीदृशो बोध्यः?
11. सिषाधयिषामात्रं न पक्षता, कुतः?
12. हेत्वाभासलक्षणं किम्?
13. को नाम बाधः (दोषः)?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पूर्वपक्षव्याप्तिलक्षणस्य क्वचिल्लक्ष्ये समन्वयं प्रदर्श्य, साध्यवदन्यत्वदलं परिष्कुरुत।
15. सिद्धान्तव्याप्तिलक्षणस्य अयं कपिसंयोगी एतद्वृक्षत्वात् इत्यत्र अव्याप्तिमाशङ्क्य निराकुरुत।

16. स्वाधीतग्रन्थदिशा पक्षतायाः अनुमितिहेतुत्वं स्पष्टयत।

17. समन्वयप्रदर्शनपूर्वकं सिद्धान्तव्याप्तिलक्षणे हेतुतावच्छेदकसम्बन्धनिवेशस्य सार्थक्यं दर्शयत।

18. हेत्वाभासलक्षणस्य समन्वयं प्रदर्शयत।

19. 'पर्वतो वह्निमान् धूमात्' इत्यत्र हेत्वाभासलक्षणस्य अतिव्याप्तिम् आशङ्क्य निराकुरुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. यथाग्रन्थं परामर्शस्य आवश्यकतां स्पष्टयत।

21. ससमन्वयं सदलकृत्यं च पूर्वपक्षव्याप्तिं विशदयत।

22. सिद्धान्तव्याप्तिलक्षणस्य समन्वयपूर्वकं दलसार्थक्यं विशदयत।

# S-III/3/22SNYS3EDTC3D/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSE-2)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. षोडशपदार्थप्रतिपादकं न्यायसूत्रं किम्?
2. न्यायमते मोक्षपदार्थः कः?
3. अपवर्गक्रमबोधकं सूत्रं किम्?
4. किं नाम प्रत्यक्षम्?
5. पूर्ववदनुमानं किम्?
6. प्रमेयबोधकं सूत्रं किम्?
7. मनसो लिङ्गं किम्?
8. को नाम संशयः?
9. अवयवाः कति? ते च के?
10. को नाम निर्णयः?
11. वादप्रतिपादकं न्यायसूत्रं किम्?
12. हेत्वाभासाः कति? ते च के?
13. छलत्रैविध्यं नाम्ना निर्दिशत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. संशयादीनां पृथग्वचनस्य आनर्थक्यमाशङ्क्य परिहरत।
15. अपवर्गोत्पत्तिक्रमं यथाग्रन्थं निरूपयत।

16. "इन्द्रियार्थसन्निकर्षोत्पन्नं. . . . . . .प्रत्यक्षम्" इति सूत्रमिदं व्याख्यात।

17. यथाग्रन्थं त्रिविधमनुमानं प्रतिपादयत।

18. पञ्च हेत्वाभासान् संग्रहेण प्रतिपादयत।

19. छलपदार्थं स्वाधीतग्रन्थदिशा निरूपयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. यथाग्रन्थं चत्वारिप्रमाणानि प्रतिपादयत।

21. "आत्मशरीरेन्द्रियार्थबुद्धिः प्रमेयम्" इति यथाग्रन्थं सूत्रमिदं व्याख्यात।

22. यथाग्रन्थं अवयवान् प्रतिपादयत।

# S-III/2/22SNYS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-07)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. प्रथमपूर्वपक्षव्याप्तेः स्वरूपं किम्?
2. "न कर्मधारयात्. . . . . .प्रतिपत्तिकरः" इति नियममम् पूरयत।
3. प्रथमलक्षणे साध्याभावः कीदृशो ग्राह्यः?
4. किं नाम अव्याप्यवृत्तित्वम्?
5. 'वह्निमान् धूमात्' इत्यत्र साध्यतावच्छेदक-हेतुतावच्छेदकधर्मौ कौ?
6. स्वरूपसम्बन्धेन साध्याभावाधिकरणत्वविवक्षणे को दोषः?
7. द्वितीयलक्षणे साध्यवद्भिन्नपदस्य कर्मधारयसमासस्वीकारे को दोषः?
8. अधिकरणभेदेन अभावभेदाभ्युपगमः कुत्र?
9. तृतीयं व्याप्तिस्वरूपं किम्?
10. किं नाम केवलान्वयित्वम्?
11. साकल्यघटितं व्याप्तिलक्षणं किम्?
12. चतुर्थलक्षणे साध्याभावः कीदृशो बोध्यः?
13. किं नाम व्यापकत्वम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रथमव्याप्तिलक्षणस्य वृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशं सार्थकयत।
15. प्राचीनमतरीत्या प्रथमव्याप्तिलक्षणस्य विग्रहवाक्यं प्रदर्श्य निराकुरुत।

16. द्वितीयलक्षणस्य अव्याप्यवृत्तिसाध्यकसद्धेतौ अव्याप्तिमाशंक्य निराकुरुत।

17. 'घटाकाशसंयोग-घटत्वान्यतराभाववान्-गगनत्वात्' इत्यत्र अव्याप्तिमाशंक्य निराकुरुत।

18. चतुर्थलक्षणे साकल्यविशेषणस्य सार्थक्यं स्पष्टयत।

19. 'पञ्चमलक्षणे साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम्', कुतः? स्पष्टयत।

## खण्डः - ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. सदलकृत्यं समन्वयपूर्वकं प्रथमव्याप्तिलक्षणं प्रतिपादयत।

21. यथाग्रन्थं साध्यवद्भिन्नेत्यादिलक्षणं विशदयत।

22. साकल्यघटिलक्षणस्य सदलकृत्यं समन्वयं दर्शयत।

# S-III/1/22SNYS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-06)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. पदार्थप्रतिपादकं न्यायसूत्रं किम्?
2. प्रत्यक्षप्रमाप्रतिपादकं न्यायसूत्रं किम्?
3. शेषवदनुमानं नाम किम्? उदाहरत।
4. प्रमेयप्रतिपादकं न्यायसूत्रं किम्?
5. चेष्टापदार्थः कः?
6. संशयप्रतिपादकं न्यायसूत्रं किम्?
7. को नाम दृष्टान्तः?
8. सिद्धान्तः कतिविधः? नाम्ना निर्दिशत।
9. अवयवप्रतिपादकं सूत्रं किम्?
10. को नाम तर्कः?
11. हेत्वाभासाः केन सूत्रेण प्रतिपाद्यन्ते?
12. का नाम जातिः?
13. छलं कतिविधम्? स्पष्टयत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्वाधीतग्रन्थोक्तदिशा चत्वारि प्रमाणानि सङ्ग्रहेण प्रतिपादयत।
15. प्रत्यक्षप्रतिपादकं सूत्रं यथाग्रन्थं प्रतिपादयत।

16. “अथ तत्पूर्वकं त्रिविधमुनमानं. . . . . .” इत्यादि सूत्रं विमृशत।

17. ग्रन्थोक्तदिशा सिद्धान्तपदार्थम् उपवर्णयत।

18. “प्रतिज्ञाहेतूदाहरण. . . . . .” इत्यादि सूत्रं व्याख्यात।

19. यथाग्रन्थं छलपदार्थं विशदयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. यथाभाष्यं “दुःखजन्मप्रवृति. . . . .अपवर्गः” इति सूत्रं व्याख्यात।

21. ग्रन्थोक्तदिशा हेत्वाभासान् निरूपयत।

22. यथाग्रन्थं प्रमेयपदार्थं विमृशत।